कर्त्तव्यो दंडी चाध्ययनोद्यतः दूर्वाश्यामस्तु कर्त्तव्यः कृष्णाजिनधरस्तथा सजलांबुदसंकाशस्तथाका

र्यास्त्रिविक्रमः दंडपाशधरः कार्य्यः शंखचक्रगदाधरः शंखचक्रगदापद्मकार्य्योस्तस्य स्वरूपिणः निर्दिष्टा
स्तेन कर्त्तव्याः शेषः कार्य्यश्च पूर्ववत् एकोर्द्धवदनः कार्य्यो देवो विस्फारितेक्षणः कार्य्यस्तु भार्गवो रामो ज
टामंडलदुर्दृशः हस्तेस्य परशुः कार्य्यः कृपाणेन धरस्य तु एमोदाशरथिः कार्य्यो राजलक्षणलक्षितः भर
तो लक्ष्मणश्चैव शत्रुघ्नश्च महाशयः तथैव सर्वे कर्त्तव्याः किंतु मौलिविवर्जिताः कृष्णस्तु कृशधरः कार्य्यो वि
लोत्पलदलच्छविः इंदीवरधरा कार्य्या तस्य साक्षाच्च रुक्मिणी सीरपाणिर्बलः कार्य्यो मुसली चैव कुंडली
श्वेतोतिनीलवसनो मदाघूर्णितलोचनः चापबाणधरः कार्य्यः प्रद्युम्नश्च सुदर्शनः राजन्दूर्वादलश्यामः श्वे
तवासा मदोत्कटः कामदेवस्तु कर्त्तव्यो रूपेणाप्रतिमो भुवि अष्टबाहुः स कर्त्तव्यः शंखपद्मविभूषणः चाप
बाणधरश्चैव मदाकुंचितलोचनः रतिः प्रीतिस्तथा शक्तिर्मदशक्तिस्तथोज्ज्वला चतस्रस्तस्य कर्त्तव्याः
पत्न्यो रूपमनोहराः चत्वारश्च करास्तस्य कार्य्या भार्य्यास्तनोपमाः केतुश्च मकरः कार्य्यः पंचबाणमुखो

महान् कर्त्तव्यस्त्वानिरुद्धोपि खड्गचर्म्मधरः प्रभुः शांर्गवः कार्य्यो महाहस्तः सुरूपोऽसौ विशेषतः शांबानिरुद्धौ
कर्त्तव्यौ यथा भौरङ्गवाससौ गोपालप्रतिमां कुर्य्यात्तवेणुवादनतत्परां बर्हापीडं घनश्यामां द्विभुजामूर्द्ध्वसं
स्थितां काषायवस्त्रसंवीतस्कंधसंन्यस्तचीवरः पद्मासनस्थो द्विभुजो ध्यायी वृद्धः प्रकीर्त्तितः दूर्वाश्यामो
नरः कार्य्यो द्विभुजश्च महाभुजः नारायणश्चतुर्बाहु नीलोत्पलदलच्छविः तयोर्मध्ये तु बदरी कार्य्या फल
विभूषणा नरनारायणौ देवौ वक्षमालाधराबुभौ च्युष्टचक्रोस्थितौ यानेभूतपुङ्के मनोरमे कृष्णाजिन
धरौ दांतौ जटामंडलधारिणौ पादेनचैकेन रथ्यांस्थितेनचैकेन चस्वनुगेन कार्य्यो हरिश्चात्र नरेणानुलम्बः
कृष्णोपि नारायणात्तुल्यमूर्त्तिः मूर्त्तिमत्यपि वीहस्तन्यस्तपादः सितः छविः नीलांबरधरः कार्य्यो देवो हय
शिरोधरः विद्धि संकर्षणांशेन देवं हयशिरोधरं कर्त्तव्योऽष्टभुजो देवस्तत्करेषु चतुर्षु च शंखचक्रगदाप
द्मान्साकारान्दर्शयेत्तु षः चत्वारश्च कराः कार्य्या देवानं देहधारिणां देवेन मूर्द्धि विन्यस्तासर्वाभरणा

१८ धारिणां पृथुमंत्रविद्रिः वैराग्यं कापिलं तत्तु माश्रितं मध्ये तु तत्करः कार्य्यस्तस्योत्संगगतः परः दोर्युगं चाप
रं तस्य शंखं च कपरं भवेत् पद्मासनोपविष्टं च ध्यानसंमितेक्षणः कर्म्मयोगः कपिलोऽयं जटामंडलदुर्दृशः ।
वायुसंबोधयीनांगः पद्माकच्चरणा हृदयः सनाजिनधरो राजन् सम्भ्रमयज्ञोपवीतवान् विभुर्मेत्र महापप्रकर्णिका
मध्यमास्थितः वैराग्यभावेन महानुभावो ध्याने स्थितः स्वं परं पमंतत् ध्यायं तत्पार्श्वे भुवनस्य गोप्तास्य
पूर्वकाष्ठपुरुषः पुराणः श्यामवर्णा तनुर्व्यासः पिंगलाश्मश्रोजटाधरः सुमंतुजैमिनिः पैलो वैशंपायनश्च तस्य
शिष्यास्तु कर्त्तव्याश्च लारः परिपार्श्वकाः गौरस्तु कार्य्यो वाल्मीकिर्जटामंडलदुर्दृशः तपस्यभिरतः शांतो नकृ
शोनच पीवरः वाल्मीकिरूपं सकलं दत्तात्रेयस्य कारयेत् जलमध्यगतः कार्य्यः शेषः पन्नगदर्शनः फणा
पुंजमहारत्नाद्युर्विरीक्षणितोधरः देवदेवस्तु कर्त्तव्यः शेषभोगांकसंस्थितः एकोभुजोऽस्य कर्त्तव्यस्तत्र जानौ प्र राम
सारितः कर्त्तव्यो नाभिदेशे तु तदा तस्यापरः करः तस्यैव न्यः करः कार्य्यो देवस्य पृष्ठितोधरः संतानमंत्रीधासि १८

नद्यैवास्यपरोभवेत् नाभीसरसिसंभूतेकमलेतस्यपादृग सर्वलक्ष्मीमयोदेवः प्रोग्नकार्य्यः पितामहः नालल
ग्नोचकर्त्तव्योयग्रस्यमधुकैटभौ रूपधारीणिभुजंगमश्चैकार्य्योरायथास्त्वारिणितथासमीपे तार्क्ष्यामरक
तपुरस्थः कौशिकाकारनासिकः चतुर्भुजश्चकर्त्तव्योवत्तनेत्रमुखस्तथा ग्रीवोरूजानुचरणः पक्षद्वयविभूषितः पु
भासंस्थानसौवर्णः कलापेनविराजितः छत्रंचपूर्णकुंभंचकरयोस्तकारयेत करद्वयंचकर्त्तव्यंतथाविरचितांज
लि यदास्यभगवान्पृष्ठेछत्रकुंभधरौकरौ [illegible] तत्र्योतुकर्त्तव्योदेवपादधरावुभौ किंचिल्लंबोदरः कार्य्यः सर्वा
भरणभूषितः विश्वकर्मशास्त्रेच लक्ष्मीनारायणौकार्य्यौसंयुतोदिव्यरूपिणौ दक्षिणस्थाविभोर्मूर्त्तिर्ल
क्ष्मीमूर्त्तिस्तुवामगाः दक्षिणांकंवलग्नोऽस्यवामहस्तसरोजभृक विभोर्वामकरोलक्ष्म्याः कुक्षिभागेस्थितः
सदा सर्वावयवसंपूर्णासर्वालंकारशोभिना सुनेत्रकपोलास्यरूपयौवनसंयुताः सिद्धिः कार्य्यासमीपस्था
चामरग्राहिणीशुभा कर्त्तव्यंवामनंसर्वदेवाधोभागगंसदा शंखचक्रधरौतस्यद्वौकार्य्यौपुरुषोपुरःवामनोह्य

१९ रकेयूरकटीरमणिभूषितौ उपासकसमीपस्थौ प्रभोर्वेत्रशिखात्मकौ रथानांयोगपरंचशिखामंजलिमास्थि
तौ इतिलक्ष्मीनारायणमूर्त्तिः पद्मासनसमासीनःकिंचिन्मीलितलोचनः घ्राणाग्रेदत्तदृष्टिश्च श्वेतपद्मो
परिस्थितः वामदक्षिणगौहस्तावुभावुत्संगभागगौ ततकरद्वयपार्श्वस्थेपंकेरुहमहागदे ऊर्द्ध्वकरद्व
येचास्यशंखचक्रापिसुदर्शनं योगस्वामीसविज्ञेयःपूज्योमोक्षार्थयोगिभिः श्रीहयशीर्षपंचरात्रे अतःप
रंप्रवक्ष्यामिमत्स्यादीनांतुलक्षणं षट्त्रिंशदंगुलायामंतदर्द्धेनतुविस्तृतं दैर्घ्याष्टमांशांगुष्ठकंतुका
रयेत रोहितंविरचितास्यंद्वादशांगुलमानतः कलैकंपुच्छतोमत्स्यपुच्छार्द्धकोद्गतंतथा कृतस्येवंविधस्ये
। हरोहितस्यमुखोद्धृतं कृत्वावांगुल्यपर्य्यन्तमुद्गच्छंतंस्वरोत्तमं रुकूर्मंकारयित्वेवं कूर्मंवास्थापयीतयः स्व
वंशोद्धरणांतस्यजायतेमुक्तिरेवच वेदांकलाष्टकायामंयोत्रमस्वद्विगालके हतसप्तांगुलेतस्यस्वक्षिणीत्वं पाम
गुलेमते सप्तांगुलंमुखंप्रोक्तंरदौसार्द्धकलौद्विज नासारंध्रंभवेन्नेत्रं यवहीनेःस्थिणीमते। किंचिद्वक्रो॥ १९

स्यात्तेषां नेत्रे द्वे गोलकसमायते· चतुष्कलं करौ मध्यं तद्वैर्द्ध्यं तु द्विगुणितं वस्वंगुलं भवेद्ग्रीवा नेत्रैकं चोन्नता तु
सा शेषं नृसिंहवत्कार्यं वराहस्य तु विग्रहं शेषाहिविष्टं तं पादे बाहुना धारयन् धरां शंखं वामे तथा लक्ष्म
गदा चक्रे तु दक्षिणे एवं नरवराहं च कृत्वायः स्थापयेन्नरः भवोदधिसमुत्तीर्णं राज्यं चाहतकंटकं प्राप्नुयान्ना।
त्र संदेहो ह्यत्र देहे वैवाभुवि तिर्यङ् नृसिंहदेवस्य तथा विपुलमाननं चतुर्नले स्यात्तथा नेत्रे स्कंधौ नालमितौ भ्रु
वौ भ्रुवौ व्याकुंचिते वक्त्रं विवृतं चोग्रदंष्ट्रकं लेलिहाना तथा जिह्वा समुद्धृतसटं शिरः दंष्ट्रे त्र्यंगुलनिष्क्रां
ते वक्त्राग्रे तु सिते तथा त्रिकलाभ्यधिकं वक्षः पंचनेत्राधिका कटिः द्विकलाभ्यधिकौ चोरू जानू चापि क
लाधिकौ जंघे सार्द्धकले मध्ये विस्तृतायै विभागतः ऊर्द्ध्वौ किंचित्स्थितौ पादौ बाहुमूले कलाधिकौ किं
चित्किंचिन्न्यूना हीनौ यथ्यंते चोपबाहुकौ वपुरित्थं नृसिंहस्य कुर्याद्देशिकसत्तमः जान्वंशेन समं स्थाप्य
विदारितमहासुरं भूषितं वैजयंत्या शुभमालयाङ्गे समन्वितं एवं चक्रधरं देवं नृसिंहं कारयेद्बुधः स्या

२० पयेत्स्थापनागायजयायमनरक्षेहरिं भुजंत्रिगोलकायामंशङ्खोद्विस्फारशोभितं पाणिपादंतृतीयांशंपुर्व्वद्धिपरसंत
या उर्व्वंघ्रिद्विनयायामविहीनमुखयुग्मकं कटिस्फिक्पार्श्वनाभीहृन्हृदुदुंवामनंवपुः कृत्वासंस्थापयेद्देवंमोहना
र्थायसर्व्वथा जामदग्न्यंतुकुर्व्वीतजटामुकुटमंडितं चतुर्बाहुंमहाभागंसर्व्वक्षत्रांतकंविभुं दक्षिणोपरशुंहस्तेवामे
दद्यात्तथाधनुः खड्गंदक्षिणहस्तेनुवामहस्तेनुखेटकं कुठारहस्तद्विभुजंकुर्य्याद्वारेणुकासुतं कृत्वैवंजामद
ग्न्यंतुस्थापयेघस्तुमानवः सर्व्विघ्नप्रभुपात[illegible]कामांश्चमनसेप्सितान् कुर्य्याद्दाशरथिंरामंसपत्नालंचतुर्भु
जंशरकार्मुकहस्तंतुशंखचक्रधरंशुभं दक्षिणोर्द्धेभवेच्चक्रंवामोर्द्धेशंखमेवच दक्षिणाधोभवेद्बाणोवामाधोध
नुरेवच द्विभुजंशंखहस्तंवारामंकुर्य्यात्सुकामदं कृत्वैवंराघवंरामंसर्व्वलक्षणसंयुतं क्रूरशत्रुविनाशायस्थापये
त्सर्व्वकामदं तृतीयंतुतथारामंचतुर्बाहुंप्रणम्यमे वामोर्द्ध्वेलांगलंदद्यादधःशंखंसुशोभनं गदांचक्रपाणौवा राम
दद्यात्संस्थानेशार्ङ्गचक्रयोः कृत्वैवंवलदेवंतुयोनरः स्थापयेच्छुभं पुत्रंददातितस्यासुविपक्षांश्चजयत्यसौ २०

दशतालं तथा चतुर्भुजं पद्मासनगतं हरिं पुलं वज्रवरांकुर्याच्छ्रीवत्सालंकृतं तथा मणिनाभं समाधिस्थं पद्मास्थं पद्म
लोचनं समाधिस्थो ज्ञानमार्गं योगदृष्टिं समन्वितं स्थापयेद्रूपकामस्तु पिनेव जगतः स्थितं कल्किनं तु चतुर्बाहुं
बद्धतूणं धनुर्द्धरं शंखचक्रधरं कुर्यात्तथा खड्गधरं प्रभुं द्विभुजं वा हयारूढं खड्गपाणिं सुरेश्वरं कल्किनं स्थापये
देवं शांकस्थानं लभेन्नरः इति दशावतारप्रतिमालक्षणं किंच आदिमूर्त्तिर्वासुदेवपूर्वमेवोदितो मया दक्षिणो
र्द्धे गदा यस्य वामोर्द्धे चक्रमुत्तमं ब्रह्मेशौ पार्श्वगौ नित्यं शेषमन्यच्च पूर्ववत् द्वितीयो वासुदेवोयं द्वापरादौ स
उच्यते द्विभुजो वाथ कर्त्तव्यो वामे शंखधरः प्रभुः वरदो दक्षिणे नाथ वासुदेवो द्विधोदितः बलदेवश्चतुर्बाहुः
कुंडलैकविभूषितः लांगली मुसली देवो गदापद्मधरो विभुः शंखचक्रगदापाणिः कर्त्तव्यो वरदोथवा प्रद्युम्न
स्तु चतुर्बाहुः शंखचक्रधरः प्रभुः चक्रं दक्षिणहस्ते च वामहस्ते धनुस्तथा शंखं च दक्षिणे दद्यात् दंडं वामे प्रदर्शये
त् प्रद्युम्नं कारयेद्देवं सर्वलक्षणसंयुतं स्त्रियौ चैवास्य कर्त्तव्ये खड्गचर्मधरे शुभे एतत्प्रीत्योर्मध्यगतं कंबुग्री

२१ वंसकार्मुकं द्विभुजं वा रहस्तं वा प्रद्युम्नं कारयेद्बुधः अनिरुद्धः कंबुग्रीवश्चतुर्बाहुः प्रभूषितः दक्षिणेस्य गदां दद्याच्चक्रशंखौ
तु वामतः दक्षिणे च तथा पद्ममनिरुद्धस्य दापयेत् नारायणश्चतुर्बाहुः कार्य्यस्तल्लक्षणं मया मूर्त्तिर्ह्येदशके सर्वे
कीर्त्तितं ब्रह्मणाः शृणु चतुर्मुखश्चतुर्बाहुर्बृहज्जठरमंडलः ऊर्द्धमूर्द्धजटाजूटः सकूर्चः समभेखलः शोभनं दक्षि
णे हस्ते दद्याद्दद्याक्षसूत्रकं श्रुवं च दक्षिणे दद्याद्वामहस्ते तु कुंडिकां आज्यस्थालीं कुशोपेतां वामहस्ते नियो
जयेत् शंखचक्रगदापाणिः कार्य्यो वा पद्मसंभवः सरस्वती च सावित्री वाम दक्षिणसंस्थिते कर्त्तव्या मुन
यो वा च परिवार्य्य व्यवस्थिताः विनिविष्टः सदा ब्रह्मा कार्य्योन्येज्यस्तनोः स्वयम्या नृसिंहवक्त्रमानुकिंचिदभ्य
धिकः सन् विष्णुरष्टभुजः कार्य्यश्चतुर्बाहुरथापि वा वैनतेयगतः सौम्यः संदष्टोष्ठपुटोऽपि वा खड्गं गदां शा
रं दद्याद्दक्षिणे करदोऽपरः कार्मुकं खेटकं चक्रं शंखं वामे प्रदापयेत् चतुर्भुजे गदां देयाद्दक्षिणे वरदो वरः राम
वामे शंखं च चक्रं च विष्णौ रेवं द्विधा मतः नरसिंहश्चतुर्बाहुः शंखचक्रगदाधरः शंखचक्रधरो वापि विदारितम २१

हास्यः चतुर्बाहुर्वा शंखं हस्ते शेषपाणिपद्मधृतः धारयन्बाहुनाथ्वा वामेनैकमलामथ्वा॥ पादलग्ना धराकार्या पद्मा
लक्ष्मीर्भुजस्थिता वराहं कारयेद्देवं शंखचक्रगदाधरं स्तन्नतानौ पुरास्येनैवराहनरकेशरी नवतालावध्यधि
कोपुरस्तात्कथितो नव इति नवव्यूहप्रतिमालक्षणं किंच अष्टबाहुर्बुधः कुर्याद्देवं त्रैलोक्यमोहनं गरुडासन
गं देवं पुण्यमेवयासिस्थितं॥ चक्रं खड्गं च मुषलं सांकुशं दक्षिणे न्यसेत् शंखं शार्ङ्गं गदां पाशं वामहस्तेषु विन्यसेत्
लक्ष्मीसरस्वतीकार्ये पद्मवीणासमन्विते किंच प्रतिष्ठासंग्रहे अष्टबाहुः पूर्वमेव कथितः पुरुषोत्तमः चतुर्बा
हुं द्विबाहुं च लक्ष्ये पान्कथयामि ते दक्षिणे शांतिदं हस्तं कुर्यात्पद्मं दयान्वितं वामोर्द्ध्वे कारयेच्चक्रं पांचजन्यं तथापर/
धः श्रीपुष्टिसहितं कुर्याच्चतुर्बाहुं सतोत्तमं प्रासादे स्थापयेन्नित्यं गृहे वामं तु पेपिवा अथ द्विबाहुतं देवं कुर्या
द्वेदद्वयेन तु एकं शांतिकरं हस्तमपरं चक्रभूषितं श्रीसरस्वतीसंयुक्तमेकमायतने न्यसेत् गदाचक्रधरं वापि
द्विभुजं पुरुषोत्तमं शीरपाणिसमोपेतमेकानेशान्वितं विभुं चतुरस्रायतने धाम्नि स्थापयेत्सर्वकामदं त्वतसीपुष्प

२२ संकाशंपीनवक्षःस्थलोरसं लावण्यामृततोयेनसिंचतमिवसर्वसर्वतः त्रैलोक्येयस्यरूपेणानभूतोनभविष्यति
तद्देवंकारयेत्सौम्यंपुरुषोत्तमसुत्तमं बलदेवंहिदार्द्ध्रं मदविभ्रांतलोचनं लांगलासक्तपाणिंतु मुषलोद्यतद
क्षिणं कुर्य्याद्वामतस्वाक्कौस्तुभांकंचकौस्तुभोभनौ धरचापधरौवापिवरशांतिप्रदौतथा कार्य्यौभुजौमहा॥
भागवलदेवस्यसत्तम भोगान्पंचाथवासप्तकुर्य्याद्दस्यत्वनंतवत् एकानंशांतयोर्मध्येकारयेत्सौम्यरूपिणीं
वरदांपद्महस्तांवादक्षिणेनभुजेनतु ज्योतिःस्थवामहस्तंतुकुर्य्याद्द्रष्टांतुरम्यवीर एवंतेद्विभुजांविष्णुःकल्पि
तःसर्वकामदः बलदेवेनसहितोभद्र्याचसमन्वितः देवस्यदक्षिणेपार्श्वेसुभद्रांविनिवेशयेत् ततःपरेमदाक्रां
तलोचनंस्थापयेद्बलं इतिपुरुषोत्तमः किंच विंशद्बाहुंविश्वरूपेकुर्य्यात्तल्लक्षणांशृणु चक्रखड्गंचमूषलंमंकुशं
पट्टिशंतथामुद्गरंचतथापाशशक्तिशूलंशरंतथा दक्षिणेषुप्रदद्याद्वैवामेषुश्रृणुतांपुनः शंखशार्ङ्गंगदापाशां राम
तोमरंलांगलंतथा परशुछुरिकांदंडंचर्मप्रक्षेपणांतथा नृसिंहोक्तंपरंमानंविश्वरूपस्यकीर्तितं चतुर्मुखंदक्षि २२

रोस्यचित्रं वामतो न्यसेत् स्तुवंतो मुनयः कार्या विद्रुवंतो निशाचराः ॥ इति विश्वरूपः वामपार्श्वेन शायितं कारयेज्ज
लशायिनं शेषपर्यंकगं देवं चतुर्बाहुं जनार्द्दनं श्रियाध्यैनैकचरणां सर्वालंकारभूषितं इति जलशायी किं च स्व
स्तनालानुकर्त्तव्या देवी लक्ष्मीः सुरेश्वरी ततक्रमं सौरकांडे तु कथिष्ये तवानघ नवतालिकदेहां तु कथामाना
मितः अष्टा सु भवेयवाधिके कार्यं यवहीना तु नाधिका गोलकेनाधिकं वक्त्रमूर्द्धं तिर्यग्विवर्जितं आयतेन यनेका
र्ये त्रिभागो नेर्ययवैस्त्रिभिः तदर्द्धेन तु वै पुल्लं नेत्रयोः परिकल्पयेत् कर्णापांगोऽधिकः कार्यः स हि शया समसंस्थि
तः नम्नं कलाविहीनं तु कुर्याद् दद्ययं सदा ग्रीवा सार्द्धकला कार्या तत् हिक्कारोपशोभिता नेत्रं विना तु विस्तारे ऊरुस्ता
उच्चपिंडिका चंक्रे स्फिचे क्वर्ताय यथायोग्यं प्रकल्पयेत् सप्तांशो नाम्न यांगुल्यो दैर्घ्यं विष्कुंभनाहतः नैनैक
वर्जिता यामाउं चो रुचतन्याकटिः मध्यं पार्श्वं च तत् द्वन्नं घनपीनं कुचद्वयं स्तालमात्रो स्तनी कार्यो कटिः सार्द्धः
कलाधिका शेषमन्यच्च यथोद्दिष्टं लक्ष्म्यैचैयं प्रकीर्त्तिता सर्वाभरणसंपन्ना मध्ये स्यामा स्तनोन्नता लोसीत

२३ टस्तुविस्तीर्णा काय्यौ देवी सुरेश्वरी द्विभुजा कंबुग्रीवा च विशाला स्थी सुलक्षणा स्तनौ समुन्नतौ काय्यौ कंचुके
नावगुंठितौ नागहस्तोपमौ बाहू ऊरू रंभासमौ शुभौ नानारत्नोज्वलं पट्टं देव्याः शिरसि दापयेत नानारत्नो
ज्वला देव्या मेखला श्रोणि संयुता मुक्तादिग्रथेन हारेण केयूर कटकोज्वला पद्मासना प्रकर्तव्या पद्मश्रीफल
पाशिका दक्षिणे पुंडरीकं तु वामहस्ते तु श्रीफलं स्थिया त्रिवलीभंगशोभिता च प्रशस्यते स्त्रियो पार्श्वद्व
ये काय्यौ शुभे चामरहस्तके भृंगारहस्तौ द्वौ नागौ तत्पर्यंतौ स्त्रियं स्थितौ श्रीरियं लक्षणोपेता स्याद्विलास
वै कामदा इति लक्ष्मीः लिंगेशस्य प्रवक्ष्यामि तद्रूपं सुशोभनं नरतुभवे ऊर्ध्वं मासिकाचंचुकान्विता
षडंगुलो मुखायामस्य ऊर्ध्वं तु रूपेण कल्पिता मस्तके मुद्गरं केशांते ग्रैवेवास्य वर्तुले ऋगायुतो द्विभुजो वा
स्य पक्षौ कार्यौ सुशोभनौ स्कंधप्रदेशसंलग्नौ ज्वलदग्निसमप्रभौ पादयोर्नराः कार्याः सकुंडलमं राम
डिता नूपुरेण स्य द्वौ नागौ केयूरोपमकंबलौ कटिदेशस्य कुलिकः परिधानस्य वेष्टनः वक्षिणे केःक २३

र्णिकाकार्य्यो गर्भगृहस्य महात्मनः देवस्याग्रतोऽस्याः क्षोभपृष्ठ्यां वा मंडपेऽथवा प्रासादस्य प्रमाणेन का
र्य्यो गर्भगृहमंडपः ॥ यद्वाः समस्तर्क्षु पः ०० ? कार्य्यः प्रासादस्याग्रतोऽर्धतः इति चैनं नेयः किंच नैत्रैव सर्वेषा
मेव देवानां विमूक्तं मानमुच्यते देवीनामपी सर्वेषां लक्ष्मुक्तं मानमुच्यते किंकरणाभ्युकर्त्तव्याः सप्त
संस्थानसंयुताः सप्तप्रमाणमूर्त्तिग्राधिकादिदोषः मान्स्यै नाधिकांगी न हीनांगी कर्त्तव्या देवता क्वचित्
स्वामिनं घातयत्यूना करालवदना नया अधिका शिल्पिनं हन्यात्कृत्वा चैवार्थनाशिनी कृशोदरी तु दु
र्भिक्षं निर्मांसा धननाशिनी वक्रनासा तु दुःखाय संक्षिप्तांगी भयंकरी चिपिटा दुःखशोकाय अनेत्रा नेत्र
नाशिनी दुःखदा हीनवक्त्रा तु पाणिपादकृशा तथा हीनांगा हीनजंघा च भ्रमोन्मादकरी नृणां शुष्कवक्त्रा
तु राजानं कटिहीना च या भवेत् पाणिपादविहीना यां जायते नरको महान् जंघाहीना तु यान्वर्थो शत्रु कल्या
णकारिणी पुत्रमित्रविनाशाय हीनावक्षःस्थले तु या संपूर्णावयवा या तु आयुर्लक्ष्मीप्रदा सदा वारखां

२८ त्रयभयमन्यंगायां हीनांगायामल्पकता कर्त्तुः श्यानो दृष्ट्यौपद्रवमर्थविनाशः कृशांगायां मरणं तु तस्य ना
यांश स्वनिपातेन निर्दिशेत् कर्त्तुः वामे विनता पत्नी दक्षिणा विनता हि नत्स्यायुः ऊर्ध्वं यत्नमूर्द्धं दृष्ट्या कारोति चिं
तामधोमुखी हृष्टिः किंच श्रीपद्मादेः क्रतुरतो हारे सुवर्णलक्ष्मी हीनां यस्तु पूजयते नरः तस्याल्पं नाभिमूलां
नितस्मात्तां परिवर्जयेत् अथ द्रव्यभेदेन श्रीमूर्त्तिभेदः मात्स्ये चित्रजा चैव लेप्या च शल्लोत्कीर्णा च पाकजा प
टे कुड्ये पट्टे च चित्रजा प्रतिमा स्मृता लेप्या तु पार्थिवी ज्ञेया लोहजा पाकजा मता शैलजा दारुजा चैव शा
ल्लोत्कीर्णा तु कीर्त्तिता चतुर्द्धा द्रव्यभेदेन प्रतिमा परिकीर्त्तिता हयशीर्षपंचरात्रे मृन्मयी दारुघटिका लो
हजा रत्नजा तथा शैलजा गंधजा चैव कौसुमी सप्तमी स्मृता कौसुमी रत्नजा चैव मृन्मयी प्रतिमा हिताः तत्का
लपूजिताश्चैताः सर्वकामफलप्रदा किंच भाग्यदा शैलदा स्याच्चु स्वर्णजा पुष्टिदा भवेत् सुखप्रदा स्यात्ता राम
राजा राजती कीर्त्तिदा भवेत् ताम्रजा धनदा प्रोक्ता श्रीप्रदा रत्नजा मता कौसुमी सुखदा प्रोक्ता गंधजा भोग २८

ज्ञामता पुत्रगवस्त्रादिताया विष्णुमयी सर्वसिद्धिदा किंच तत्रैव चित्रनाप्रतिष्ठाप्रसंगे यावंति विष्णुरू
पाणि सुरूपाणि हलेखयेत् तावद्युगसहस्राणि विष्णुलोके महीयते लेख्ये चित्रं हरिर्नित्यं सन्निधानमुपैति
हि तस्मात्सर्वप्रयत्नेन लेख्यचित्रगतं यजेत् कांतिभूषणभावाद्यामिन्नैव यस्मात्कुर्वंत्यतः अतः सान्निध्य
मायाति चित्रस्था सुजनार्दनः तस्माच्चित्रार्चनं पुण्यं स्मृतं सततमुत्तमं बुधैः चित्रस्थं पुंडरीकाक्षं सविलासं सवि
भ्रमं दृष्ट्वा विमुच्यते पापैर्जन्मकोटिषु संचितैः तस्माच्छुभाभिर्मिधीरैर्महाभाग्यजिगीषया पटस्थपूजी
यस्तु देवो नारायणः प्रभुरिति स्वर्णशिलामहत्वं त्रिकूटाद्रिषु गंडकीयामनकिंवा श्रीपर्वतादिषु शिलाभूमिग
तां वा यत्नात्समत्स्यसुणो बुधः तथा च तत्रैव हुतारे हृतिष्ठो योगेश्वरो हेतुकरणान्विते स्वापूर्य्यमाणपक्षेत्रस्तु
गृहे चोत्तरायणे यजमानानुकूले तु प्रतिमा स्थैर्यजे हरुः श्वेतवस्त्रपरिधानः श्वेतचंदनचर्चितः श्वेतपुष्पस्रजा
पीडुः शिल्पिभिः सहितो गुरुः निपुणैः शिल्पिभिः सार्द्धं सहायैर्वल्लभजनैः नृसिंहपूज्यविज्ञाप्य पूज्यटंकादि

२५ कं ततः ध्यात्वा हरिं हविः प्राश्य मंत्रांगन्यस्तविग्रहः ब्राह्मणान्वाचयित्वानु भक्त्या मंगलदर्शनं दधिदूर्वारोचनां वा
ऽप्यादर्शं कुसुमं सितं फलं च पूर्णकुंभं च वंदयित्वा वनं व्रजेत् दिव्यांतरीक्षभौमानि निमित्तान्युपलक्षयन् यात्रा
स्वशुभनिमित्तेषु विपरीते निवर्तयेत् विरायमथ ततः प्राणान् ध्यायेन्नृसिंहं ततो हरिं पुनश्चाष्टोत्तरं जप्त्वा पाताल
नृसिंहं जपेत् गीतवाद्यरवोद्घुष्टया यात्या स्यात् सिद्धिदा नृणां लक्ष्मीं ध्यायन् वनं यायात् सहायैः शिल्पिभिः
सह शंखकाहलघण्टैः स्तुवन्नपहतापमिश्रितैः ऊरुग्रपञ्जः सामसंपैः स्तुवन् ध्यायन् नृसिंहं वनं व्रजेत् प्राचीं दिशमथो
दीचीं मे शानीं वा व्रजेत् गुरुः भूधरपार्श्वेषु ये पूर्वं संस्थानाः कथिता मया तत्र गत्वा समीपे तु कृत्वा रक्षां वनं विशेत्।
प्रविश्य तत्र यत्नेन शिल्पिभिः सहितो गुरुः निरूपयेत्समंतात्तु रम्यं वा पश्य वा शिलां लक्षणेन तु मंत्रज्ञो यत्पूर्वं क
थितं मया एकवर्णां शिलां दृष्ट्वा बाह्यदोषविवर्जितां चतुर्दिक्षु समं कृत्वा भूमिभागं विशोधयेत् स्नात्वा ततोऽपि राम
न पूतेन गोमयेन विलेपयेत् तत्रैव मंडलं कृत्वा वासुदेवं ततो जपेत् पताकैस्तोरणैश्चित्रैर्मंडपं तु विभूषयेत् पू २५

जयेद्दशादिग्देवान्भूतक्रूरबलिं हरेत् मांसं हरिद्राचूर्णं च दधिसक्तुसमन्वितं सलाजं माषभक्तं च दद्यात्क्रू
रबलिं बुधः विस्तृं पूज्य विधानेन क्रमशस्तान्प्रपूजयेत् वायव्यां मत्स्यमंत्रेण गंधपुष्पैः प्रपूजयेत् वह्निं प्र
ज्वाल्य विधिना मंत्रान् संतर्प्य पूजयेत् हुत्वा यथोक्तविधिना शांतितोयं समारभेत् शांतितोयं ततो गृह्य म
न्त्रेणाप्रोक्षयेच्छिलां दर्भैः सल्लैः खयेत्पश्चाद्दशमंत्रेण तां शिलां मंत्रैरारभ्य तां यत्नान्मृल्लकवस्त्रेण वेष्टयेत्
रक्षां कृत्वा च सिंहेन दर्भैराच्छाद्य पूजयेत् गंधैः पुष्पैश्च नैवेद्यैर्धूपैः संपूज्य तां शिलां ॥ ततस्तु मूलमंत्रेणाष्टा
ष्टमष्टोत्तरं हुनेत् ततः पूर्णाहुतिं दद्यान्मंत्रराजेन वै गुरुः एवं संतर्प्य संपूज्य वितानं च बलिं हरेत् गंधैः पुष्पै
स्तथा धूपैर्दद्यात्तु बलिं बुधः अत्र ये वास्थिताः सत्वा यातुधानाश्च गुह्यकाः सिद्धादयो वा ये चान्ये तान् संपूज्य
क्षमापयेत् विष्णुर्विं वाध्यमस्माकं पात्रैर्वा केशवा बाहया विघ्नस्थं यद्भवेत्कार्यं युष्माकमपि तद्भवेत् अनेन
बलिदानेन प्रीता भवत सर्वथा क्षेमेण गच्छतान्यत्र मुक्त्वा स्थानमिदं तव एवं प्रबोधितां सत्वा परितुष्टा यथा

२६ सुखं आचम्य संविश्य ततः कृतरक्षो गुरुः स्वयं चरुं प्राश्य निराहारः शिष्यैः सह देशिकः हरिं चिन्ताय
विधिवत् देवीं च कमलोद्भवां पश्चिमे दर्भशय्यायां रजनीं गुरुः निराहारः स्थितो भूत्वा पुमान् आरंभकं जपेत्
ॐ नमः सर्वलोकविदे विष्णवे प्रभविष्णवे विश्वाय विश्वरूपाय स्वर्गाधिपतये नमः आगच्छ देवदेवेश प्रप
न्नोऽस्मि तवान्तिकं स्वप्ने सर्वाणि कार्याणि हृदिस्थानि तानि यानि मे ॐ क्लीं फट् विष्णवे स्वाहा पदासपद्म
नेव संज्वलंतं धूमवर्जितं फलितं पुष्पितं चैव ततः सिद्धिर्न दूरतः प्रज्वलंतीं शिलां पश्येद्विष्णुनाधिष्ठि ।
तां शिलां ब्रह्मणाधिष्ठितां वापि सा तदा सर्वकामदा श्रियायुक्तं प्रज्वलंतं अथ पश्यति पर्वतं ततः प्रसिद्ध
शिखरं कांचनद्रुममंडितं युक्तं सर्वौषधैर्दिव्यैः फलपुष्पसमन्वितैः एवमन्येन तु संदृष्टे स्वप्ने स्वर्चां शुभलोम
ना अपरे हनि संप्राप्ते कृतरक्षः कृताह्निकः शास्त्रोक्तविधिवत्पूज्य शिलां पूज्यविधानतः अर्घ्यं दत्वा शि राम
लायां तु शास्त्रमंत्रेण पूजयेत् मंत्रपिंडा स्वमंत्रेण प्रज्वलंतीं विभावयेत् पश्चात् शुक्लं सुखं कृत्वा स्नात्वा तं २६

चिंतयेद्गुरुं शिल्पिनं विश्वकर्म्माणं आन्तोदक्प्राङ्मुखोपि वा गात्रं निस्मात्मकं ध्यात्वा प्रदद्याच्छिल्पिने
गुरुः मुखपद्मांसलां मूलशिल्पिने दर्शयेद्गुरुः श्लक्ष्णं गंधानुलिप्तांगः स्नातः पुष्पाद्यलंकृतः उदङ्मुखो
वाप्यपतिः प्राङ्मुखः संयतः शुचिः ध्यात्वात्मदेवतां शिल्पी टंकहस्तो जितेंद्रियः पश्चेच्छं शातयेत्पश्चाच
च्छिद्रलां रक्तचूर्णपूर्वमे उदक्शिरां प्राक्शिरां वा नयेदेशानदिग्गतां ऊर्द्ध्वभागं भवेन्नपत्ये अधोभागं भवेन्मु
खं किंचिन्मानाधिकां कृत्वा कल्पयेत्प्रतिमाशिलां किंचन्मानाधिकां त्यक्त्वा ज्यायोविधिविधायाच पिंडिका छेद्यपि
त्वा समुद्रस्य चतुरस्त्रां तु कारयेत् स्वे स्वे नैव विधानेन परीक्ष्य गुणदोषतः रत्नं यत्नेन गन्धो या विधिना देशि
कोत्तमः ॥ समानीय रथं यत्नेन छंदुरी लेखकभैर्युतं रथे स्थाप्य शिलां यत्ना रक्षार्थं पिलानुवासस्या हरिध्याला
स्मरन्मंत्रमर्थं दद्यात्ततो गुरुः स्नानीयमानेनु रथे रथांगपरिचारकैः ष्ट्वभेवा समुत्सवे स्वनिमित्तेन साधकः
वेदध्वनिघोष सिंहैः नर्त्तिकैर्विविधैर्भिन्नैः कुर्वाचाप्यशानं सम्यक् नद्यां वा तटाकेनु स्थाने स्नानीयशांखनिर्घो

२७ घोषैर्गीतमंगलनिस्वनैः प्रासादस्योत्तरे भागे कृत्वा कर्मकुटीं गुरुः शिलां संस्थाप्य तस्मिंस्तु समर्चयित्वा बलिं हरे
त् ततः प्रवर्त्तयेत्कर्म विद्वान्विप्रैस्तु शिल्पिभिः किं च यथोक्तायां दिशायां तु न लभ्येत यदा शिला तदा विदिक्
स्थिता ग्राह्या विधिना येन तच्छृणु समानीय शिलां सम्यक् पूर्वोक्तैर्लक्षणैर्युतां प्रासादस्योत्तरे भागे खात्वा
भूमिं विधानवत् शिलां संस्थाप्य ततस्तानेमृदा संपूरयेद्गुरुः समाकृत्य तु तां भूमिं दर्पणं च कारयेत् पताकाध्व
जपत्राद्यैर्भूषयीत समंततः तोरणैः कदलीस्तंभैर्वितानैश्च भूषयेत् प्राच्यां तु मंडपं कृत्वा तत्र विघ्नं यजेद्गुरुः प्र
वालमुक्ताफलैर्हैर्मपुष्पैः सपल्लवैः पूर्वोक्तं सकलं चापि विधानं समुपाचरेत् भूतकूरबलिं दत्वा पूर्वोक्तविधिनैव
तु प्रतिष्ठां पूर्वविधिना होमं कुर्याद्यथोदितं दिग्दोषपरिमुक्त्यर्थं विशेषाद्धोममाचरेत् पातालनरसिंहेन सहस्रं
वैस्मवानले दिग्देवानामथांगानां हुत्वा पूर्णां ददेद्गुरुः तर्पितेमं च राजेतु दिग्दोषैः प्रमुच्यते शिला ततः पूर्वोक्तविधि राम
ना कृत्वा पुण्याहं गुरुः पूर्वोक्तेन विधानेन शिरः पंचादिकल्पयेत् मेलादकेन संस्पर्श्य शिलां तां प्रोक्षयेद्गुरुः २७

द्विग्दोषयुक्तामानार्च्यैस्तद्विंबं भव्यां त्वलंकृतां सुवर्णाभं गंधसंयुक्तां कांस्ये दोहां पयस्विनी नाम्रपृष्ठां सोपवीतां द
द्याद्दोषप्रत्युरां गुरोः तोषयीत गुरुं यत्नाद्वस्त्रालंकरणादिभिः शिल्पिनं तोषयेद्यत्नाद्वस्त्रालंकारचंदनैः स्वा
चार्ये तोषिते विष्णुः तोषितः स्यान्न संशयः शिल्पिनं तोषयेद्देवं विश्वकर्मा प्रपूजितः ततः कर्माणि युंजीत सर्वका
मप्रदो भवेत् ॥ अथ शिलालक्षणं तत्रैव स्थानान्तसेविता या च नदीतीरसमुद्भवा पुरमध्ये स्थिता यां च नग्यापि त
वने स्थिता चतुष्पथस्थिता या च श्मशानस्थिता नापक्वरोचया उषरे च तथा मध्ये वल्मीके वापि या स्थिता सूर्यरश्मि
प्रतप्ता या या च दग्धा दावाग्निना अन्यकर्मोपयुक्ता या अश्मदेवार्थनिर्मिता क्रव्यादाद्यैरुपहता वर्ज्या यत्ने
नैव शिला येन केनचिद्दानीता वर्जनीया तथा शिला प्रयत्नेहृग्मवाग्नाख्या पुण्यतीर्थोद्भवा च या नदीपर्वत।
संलग्ना वृक्षच्छाया या घनावृता निमग्ना भूतले या च या स्पृष्टा सूर्यरश्मिभिः अंतर्जलोषिता न चा मेकव
र्णा मनोरमा पांडुरा चारुणाभिंना कृष्णा शुक्ला च वर्णिनां। नपराल भ्यते समवर्णानां वर्णितः शिला व

२८ र्णास्यापादनेनवज्रतुण्डपातसिंहविग्रहा क्रमेणैववर्णास्यजननेनस्वर्णास्यसाम्प्रभा ॐशुक्लवर्णास्ववर्णाचरेखासर्व
स्यग्रास्यते स्वप्नस्यसरस्यनुवर्णास्यश्रेष्ठस्यनग्रस्यते वर्णानामिहसर्वेषांकृष्णरेखाप्रग्रस्यते शिलाना
मिहसर्वासांशुक्लरेखाप्रग्रस्यते रेखाणामिहसर्वासांवर्जयित्वासहोमसमाचरेत पातालनरसिंहेनमहस्तदे
शिकोन्नमः तर्पितेमंत्रराजेनततःसाम्प्रदायरीणांविपरीतेनतुभिमलेविंदुकेहिरकेनच्या इममेवविधिंकुर्य्या
दन्यस्मिन्नपिगर्हिते पुत्रामध्याभवेत्स्नात्वावालाख्याचगर्हिता पुंगधानिविंशात्रिंध्यानच्यागंभीरनि
स्वना शीतलायाचतेजाद्याप्रवेतिप्रोच्यतेशिला तद्रूपाप्रोच्यतेमध्याकिंतुसाकठिनाभवेत् स्त्रीतिमृद्वी
भवेद्बालाख्यानिकठिनामता टंकाद्यानाहावालाख्यालोकस्ययंकरी स्त्रीपुंनपुंसकंचैवलक्षणेनैवल
क्षयेत तुल्याघमानेदृश्यंतेविंदुकालानवृक्षज्वलन स्फुलिंगाश्रूयतेनादःकांस्यघंटानिनादवत् मूलेम राम
ध्येनचाग्रेचपुल्लिंगोतितुसास्मृता तदेवलक्षणांयघन्मंदमंदंप्रतीयते स्त्रीलिंगेतिनदासाचभिन्नकां २८

स्याद्ध्वनिस्तथा नपुंसके तिसातेयानयत्नेन हूयंभवेत् एभिर्लिंगैः प्रतिमाकाष्ठयोस्त्रीलिंगैः पादपीठिका पिंडिका
र्यंतुसायाप्यासादृष्टाया पिंडलक्षणा लिंगानांतु विपर्यासे पूर्वोक्तं होममाचरेत् छेदने भेदने वापि शिला
गर्भः समीक्ष्यते दृश्यांतमंडलायस्मांसगर्भांतांविनिर्दिशेत् मंडुको मंडलेनस्यात्तोहिनेमात्रसंशयः हरि
द्रायेभवेद्रोधाक्रुष्णसर्पेनष्टाशिने निस्त्रिंशसदृशो नोपंगद्गोधाठकर्कशो आवपिंगलवर्तीस्याद्दृष्टो
ष्वटलस्था पिंगवर्णोतुपाषाणः पद्माभेसिकताभवेत् वृश्चिकःस्याद्विचित्रेतुपीतनीलेपतंगकः पारावता
भेरवघोतंमंडलेतुविनिर्दिशेत् अकल्मनात्तुमंडूके दौर्भाग्यंगोधयाभवेत् सर्पेद्विबेलामरणामनिष्टंवृश्चिकस्तथा ।
जले धनहानिस्तुगोधायामात्वनाभिष्टमुद्भवेत् अल्पायुष्त्वंतुमारटेपाषाणेविघ्नताबधः वालुकामनागवृष्टिः
कलहोवृश्चिकेभवेत् राष्ट्रोच्छित्तिस्तुशलभेवघोतेगोत्रसंक्षयः तस्मीत्परीक्ष्ययत्नेनशिलांगृन्हीतदेशिकः
सगर्भयातुशिलयाक्रूपकःक्रियतेयदि नदेशोभियतेराजायजमानोथदेशिकः शिलायामपिवक्ष्येपुयत्ना

२९ द्रंभेसमीक्षयेत् अथशिल्पिकृत्यं मात्स्ये विविक्तेसंवृते स्थाने स्थपतिः स्थपतेंद्रियः पूर्ववत्कालदेशज्ञः शास्त्रज्ञः
श्मश्रुभूषिताः प्रयतो नियताहारो देवताध्यानतत्परः यजमानानुकूलेन विद्वान्कर्म समाचरेत् धृत्वा पूर्वमुक्तं
द्रव्यमथवा शोभनाग्रमुक्तं दधिदूर्वाक्षतैः पूजयन्दारंभेचलिंहरेत् पूर्ववद्भूतपोषणार्थैः स्थापयेद्द्रव्यमाहरेत् शुक्लैः
गंधैःस्रक्पुष्पैश्च द्रव्यं संपूज्य भक्तितः स्वस्तिवाचनकं कृत्वा प्रतिमां संविभावयेत् अथपिंडिकालक्षणं हयशी
र्षपंचरात्रे अतःपरंप्रवक्ष्यामिपिंडिकाकरणं तव उच्छ्रायं प्रतिमार्द्धं च दैर्घ्यं तु प्रतिमासमा चतुःषष्टिपुटान्
कृत्वा पिंडिकां तत्र कल्पयेत् मध्ये पंक्तिद्वयं चाथ वस्तु दूर्ध्वं प्रत्येक कोष्ठकः समस्तमुभयेपार्श्वे सूत्रं तस्यं परिमार्जये
त् ऊर्ध्वपंक्तिद्वयं मध्ये त्यक्त्वा अधस्तात्कूर्णकोष्ठकं सूत्रं तस्य मार्जयेच्य त्वा तत्पार्श्वयोरुभयोः समं तयोर्मध्यगतो तत्र च
तुष्कोमार्जितः चतुर्द्धा भाजयित्वा तु ऊर्ध्वे पंक्तिद्वयं बुधः मेखला भागमात्रं स्यात् खातं तत्स्यादर्द्धमानतः भागं भा राम
गं परित्यज्य पार्श्वयोरुभयोः समं दत्वाचैकं पदं बाह्ये प्रमाणं कारयेद्बुधः त्रिभागेन च भागः स्याद्ग्नेस्मान्नालं परि २९

परंगताः ८ पापंकृत्वामृतायेचतेषांमुक्तिःकथंभवेत् कृपयादेवदेवेशप्रायश्चित्तमशेषतः ९
महादेवउवाच शृणुपार्वतिवक्ष्यामियत्नोप्यंममसर्वतः पुण्यवद्भिःपापवद्भिःकर्तव्यंकाशि
वासिभिः १० नकोपिदृष्टोमनुजोविनापापंशरीरभाक् कुर्वन्नपिमहापुण्यंपापंसंस्कारतश्च
रेत् ११ देहःस्वकार्यंकुरुतेइंद्रियाणिस्वकर्मसु प्रवर्तंतेवलादेवमनःकेननिवार्यते १२ प्राय
श्चित्तानिकिंतानियैःपुनःसंप्रवर्तते मनःशरीरादिपुनःप्रायश्चित्तंनतत्भवेत् १३ प्रायश्चित्त
त्रयंसूक्ष्ममनुभूतंमहात्मभिः ब्रह्महत्यादिपापानामन्यपापकृतांतुकिं १४ काश्यामपिव-
सन्जंतुर्यदिपापकृद्वेत्तर्हि प्रायश्चित्तत्रयंकृत्वासद्योमुच्येतवंधनात् १५ देव्युवाच आश्च
र्यमेतद्भगवन्त्वयानिगदितंविभो वाराणस्यांकृतैःपापैर्मुच्यतेयन्नरःसकृत् १६ कृपया
तथैतद्ब्रूहिकलावपिहिनिष्कृतिःकलौकलुषचित्तानांक्वधर्मःक्वपरंपदं १७ श्रीभगवानुवा

२९

पं·मा· व मृत्युलोकहिनेदृविलोकानामुष्मिन्निपरां मायष्मिन्नत्रयंवञ्चिकाष्टयेनः संहिधस्तानां १८

२ वापीकूपतडागिनीरोद्धारकृतां नृणां भवेन्नमहत्सापंकाश्यामपिकृतंहियत् १९ आपोनाराइतिप्रोक्ताआ

पोवैनरसूनवः अयनंतस्यताः पूर्वंतेननारायणः स्मृतः २० तेनेष्टेरेशाहरिणाकृतंपापप्रणाशनं यत्रयत्रजलं

काश्यामुद्धरेत्सुकृतीनरः २१ तत्रतत्रमुदायुक्ताः पितरः पर्युपासते काश्यांरुद्रसमाः सर्वेजंतवः श्रुतिनोदिताः २२

तेपिबंतिजलंयत्रतडागादौतृषार्दिता तत्पुण्यंनमयावक्तुंशक्यंवर्षशतैरपि २३ आसीद्धर्मपथोनामव

णिक्कश्चित्सुधार्मिकः कुलस्तंभस्तयायस्येतेनरवानःप्रस्तानितः २४ तत्रगावोमनुष्याश्च

पिबंत्यंभस्तृषार्दिताः प्रत्यहंतस्यसुकृतंवर्धतेचंद्रमायथा २५ सूक्ष्मधर्मोमनुष्याणांदु

र्लभोविषयात्मनां कालेनमहतातत्रदुर्भिक्षकरपीडितः २६ हरिद्वत्तामवापोच्चैः ब्रह्महत्या

कृतभूतः ब्राह्मणेनधनः क्वापिस्वधनार्थंकणीवणिक् २७ मदनंदेहिदुष्टेतिपरिसिद्ध्य राम

२

लासेश्रीमूर्त्तिप्रादुर्भावोनामाष्टादशोविलासः॥१८॥